| अध्यापन का माध्यम | : हिन्दी |

**प्रवेश हेतु योग्यता**
- ✓ १२+२ उत्तीर्ण एवं १८ वर्ष या उससे अधिक उम्र
- ✓ देवनागरी लिपि को पढने एवं लिखने की योग्यता
- ✓ संस्कृत भाषा का सामान्य ज्ञान

**प्रवेश हेतु संपर्क सूत्र**

**दीपेश विनोद कतिरा**
संयोजक एवं
सहायक आचार्य–व्याकरण विभाग
मोबाइल – ९५९४३ ५६८५७

**कु. विदुषी बोल्ला**
संयोजक एवं
सहायक आचार्य–व्याकरण विभाग
मोबाइल – ९८१९१ १८०२४

Register Here
https://forms.gle/zHvwCk8cB9aAMSYPA

# Ph.D. Course Work



## सम्पन्ना विद्यावारिधिकार्यशाला (Ph. D. Coursework)



विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१९-२० तमशैक्षिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं १५-१०-२०१९ एवं च २१-१०-२०१९ दिनाङ्के अकारि। अस्यां परीक्षायां विंशतिशोधार्थिनः उत्तीर्णाः अभूवन्, येषां कृते विश्वविद्यालयानुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे २०-०१-२०२० तः २९-०१-२०२० यावत् समायोजिता। अस्यां कर्यशालायां नवदश शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण प्रो. गोपबन्धु मिश्रः, प्रो. देवेन्द्रनाथ पाण्डेयः, प्रो. अर्चना दुबे, प्रो. विनोद कुमार झा, डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. महेन्द्रकुमार दवे, डॉ. शत्रुघ्न पाणिग्राही, डॉ. पङ्कजकुमार रावलः, डॉ. डी. एम. मोकरिया, डॉ. दीपेश कतिरा, डॉ. कार्तिक पण्ड्या, डॉ. योगेश पटेलः, डॉ. बी. उमामहेश्वरी, डॉ. जानकीशरणः आचार्यः, डॉ. जयेशकुमार मुंगरा, डॉ. रमेशचन्द्र शुक्लः, प्रो. पीटरशार्फ़, श्रीरवीन्द्र काले, श्रीहरेश खेरः च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कर्यशालायाः संयोजनं डॉ. कर्तिक पण्ड्या अकरोत्।

Report Source: **SOMJYOT**I- University Newsletter

## समायोजिता विद्यावारिधिशोधचर्चासमितिः (R.D.C. of Ph.D.)



विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१८-१९ तमे शैक्षिकवर्षे विद्यावारिधिप्रवेशपरीक्षायाम् उत्तीर्णेभ्यः शोधच्छात्रेभ्यः ११.०३.२०१९ दिनाङ्के शोधचर्चासमितेः (Research Discussion Committee) आयोजनं कृतम्। विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः महाभागः समितौ आध्यक्ष्यं निरवहत्। जर्मनदेशस्थ-हैडलबर्ग-विश्वविद्यालयात् समागतः डॉ. आनन्दमिश्रमहाभागः विषयविशेषज्ञरूपेण उपस्थितः आसीत् किञ्च प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमार झा, डॉ. नरेन्द्रकुमारपण्ड्यादिप्राध्यापकाः विद्यावारिधिमार्गदर्शकरूपेण उपस्थिताः आसन्। अस्यां शोधचर्चासमितौ शोधार्थिभ्यः चितानां शोधविषयाणां प्रासङ्गिकता औचित्यम् उपयोगित्वम् इत्यादिविषयाणां चर्चा अभूत्।

Report Source: **SOMJYOT**I- University Newsletter

# UGC NET/SLET Coaching Classes


## UGC NET/SLET प्रशिक्षणकेन्द्रम् -२०१५



श्रीसोमनाथसंस्कृतविश्वविद्यालये Knowledge Consortium Of Gujarat इति संस्था सहयोगेन विश्वविद्यालयानुदानायोगायोजितायाः राष्ट्रियपात्रतापरीक्षायाः (N E T), राज्यसर्वकारेणायोजितायाः राज्यस्तरीयपात्रतापरीक्षायाः (SLET) च प्रशिक्षणं दातुं प्रशिक्षणशिबिरमुद्घाटितम्। अस्य प्रशिक्षणकेन्द्रस्य उद्घाटनकार्यक्रमः स्वस्तिश्रीकीलक-भाद्रपदकृष्ण-अष्टमी-सोमवासरे ०५-१०-२०१५ तमे दिनाङ्के विश्वविद्यालयस्य सभागारे अभवत्।

अस्मिन् उद्घाटनकार्यक्रमे सोमनाथन्यासस्य (Somnath Trust) सचिवमहोदयः तथा गुजरातसर्वकारस्य पूर्वमुख्यसचिवमहोदयः (Ex. Chief Secretary of Gujarat) श्री पी. के. लहरीमहाभागः मुख्यातिथिपदमलमकरोत्। सोमनाथन्यासस्य (Somnath Trust) कार्यकारि-अधिकारिमहोदयः (Manager In-charge) श्रीविजयसिंहचावडामहाभागः कार्यक्रमे विशिष्टातिथिपदे आसीत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरीमहाभागः कार्यक्रमेऽस्मिन् अध्यक्षपदमलमकरोत्। अस्मिन् उद्घाटनकार्यक्रमे कार्यकारिकुलसचिवस्य डॉ. दशरथजादवमहोदयस्य विशेषोपस्थितिरासीत्।

कार्यक्रमस्यारम्भः वैदिक्या प्रार्थनया समभवत्। युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य संयोजकेन प्रो. विनोदकुमारझावर्येण समागतानाम् अतिथीनां स्वागतं विधाय अस्य प्रशिक्षणकेन्द्रस्य प्रास्ताविकं ज्ञापितम्। मुख्यातिथिपदेन वदता श्री पी. के. लहरीमहाभागेन उच्चतरशिक्षाक्षेत्रे गुणवत्तामवाप्तुं गुजरातसर्वकारेण अनुष्ठीयमानानां कार्यक्रमाणां विषये प्रासङ्गिकमुद्बोधनं प्रदत्तम्। महोदयेन उक्तं यद् गुजरातस्य महाविद्यालयेषु विश्वविद्यालयेषु पदानि रिक्तानि सन्ति परं योग्यानां प्राध्यापकानाम् अभावः वर्तते। अतः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आरब्धमिदं प्रशिक्षणमवश्यं छात्राणां कृते उपयोगाय भविष्यति। मान्यकुलपतिना छात्राणां सर्वविधविकासाय विश्वविद्यालयेन प्रचाल्यमानान् कार्यक्रमान् विज्ञाप्य अस्य प्रशिक्षणकेन्द्रस्य महत्त्वं प्रकटितम्। कार्यक्रमस्यान्ते कार्यकारिकुलसचिवेन डॉ. दशरथजादवमहाभागेन धन्यवादभाषणं विहितम्। समग्रास्य कार्यक्रमस्य सञ्चालनं युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य सहसंयोजकः श्रीजानकीशरणः अकरोत्।



सम्प्रति अस्मिन् प्रशिक्षणकेन्द्रे युजीसी-नेट्/स्लेट्-परीक्षायाः प्रथम-द्वितीय-तृतीयप्रश्नपत्रेषु द्वितीय-तृतीयप्रश्नपत्रयोः संस्कृतविषयमाधारीकृत्य अभ्यासः कार्यते।

Report Source: **SOMJYOT**I- University Newsletter

# श्री सोमनाथ संस्कृत युनिवर्सिटी

वर्ष-२०२० तक संस्कृत माध्यम से स्लेट (SLET) परीक्षा उत्तीर्ण कर चुके
युनिवर्सिटी अनुस्नातक भवन के चमकते सितारें

| क्रम | छात्र का नाम | मास/वर्ष | क्रम | छात्र का नाम | मास/वर्ष |
|---|---|---|---|---|---|
| १ | बारड रमेशकुमार जेसिंगभाई | Oct-१० | १२ | केलैया मौलिक जीतेन्द्रकुमार | Sep-१८ |
| २ | जादव विपुलकुमार जेसिंगभाई | Sep-१३ | १३ | जोषी ध्रुविन हसमुखभाई | Sep-१९ |
| ३ | अरुणकुमार पाण्डेय | Aug-१७ | १४ | प्रणव कश्यप | Sep-१९ |
| ४ | राहुलकुमार झा | Aug-१७ | १५ | रजनीशकुमार पाण्डेय | Sep-१९ |
| ५ | जिगर महेशभाई भट्ट | Aug-१७ | १६ | केशवकुमार पाण्डेय | Sep-१९ |
| ६ | कल्याणी हार्दिक दिलीपभाई | Aug-१७ | १७ | कृष्णकुमार पाण्डेय | Sep-१९ |
| ७ | त्रिवेदी दिलीप लक्ष्मीशङ्कर | Sep-१८ | १८ | विकासकुमार तिवारी | Sep-१९ |
| ८ | किन्जल परबतभाई गोरफाड | Sep-१८ | १९ | मणिकान्त दुबे | Sep-१९ |
| ९ | प्रकाश रंजन मिश्र | Sep-१८ | २० | राजकुमार झा | Sep-१९ |
| १० | जय कपिलभाई पाढ | Sep-१८ | २१ | रावल रामकृष्ण जसवंतभाई | Dec-१९ |
| ११ | बाकु रामभाई वीराभाई | Sep-१८ | २२ | मुंजपरा जल्पा सुभाषभाई | Dec-१९ |

# श्री सोमनाथ संस्कृत युनिवर्सिटी

वर्ष-२०२० तक संस्कृत माध्यम से नेट (NET) परीक्षा उत्तीर्ण कर चुके
युनिवर्सिटी अनुस्नातक भवन के चमकते सितारें

| क्रम | छात्र का नाम | मास/वर्ष | क्रम | छात्र का नाम | मास/वर्ष |
|---|---|---|---|---|---|
| १ | आलोक चन्द्रकान्त वाघेला | Dec-०९ | १२ | त्रिवेदी दिलीप लक्ष्मीशङ्कर | Dec-१८ |
| २ | राजपरा मनिष वल्लभभाई | Dec-१३ | १३ | गागीया जयश्री काराभाई | Jun-१९ |
| ३ | काथड कांतिलाल | Dec-१४ | १४ | भट्ट हार्दिक दिनेशभाई | Jun-१९ |
| ४ | अरुणकुमार पाण्डेय | Jul-१६ | १५ | धतुरिया हितेश मधुकरभाई | Jun-१९ |
| ५ | वाजा विनु प्रेमजीभाई | Jul-१६ | १६ | मुंजपरा जल्पा सुभाषभाई | Jun-१९ |
| ६ | कल्याणी हार्दिक दिलीपभाई | Nov-१७ | १७ | भागीरथी पात्र | Jun-१९ |
| ७ | राहुलकुमार झा | Nov-१७ | १८ | भोगायता संजय जयन्तीलाल | Dec-१९ |
| ८ | जिगर महेशभाई भट्ट | Nov-१७ | १९ | रावल रामकृष्ण जसवंतभाई | Dec-१९ |
| ९ | किन्जल परबतभाई गोरफाड | Jul-१८ | २० | गामित करिश्माबेन सुनिलभाई | Dec-१९ |
| १० | प्रकाश रंजन मिश्र | Jul-१८ | २१ | रजनीशकुमार पाण्डेय | Dec-१९ |
| ११ | मनीषा भीखाभाई राम | Dec-१८ | | | |


श्री सोमनाथ संस्कृत युनिवर्सिटी
वर्तमान वर्ष-२०२० में संस्कृत माध्यम से नेट (NET) परीक्षा उत्तीर्ण हुए
युनिवर्सिटी अनुस्नातक भवन के चमकते सितारें
श्री ऋषभ देरासरी
कु. धरमबेन कछोट
श्री रवि रादडीया
कु. सुजाता जेना
श्री केशव कुमार पाण्डेय
श्री कृष्ण कुमार पाण्डेय
2nd Time Passed
श्री प्रकाशरंजन मिश्र
कु. जल्पा मुंजपरा

# Workshops

## ब्रह्मसूत्रस्वामिनारायणभाष्यश्लाका – कार्यशाला

BAPS स्वामिनारायण संशोधनकेन्द्रस्य तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालस्य संयुक्ततत्त्वावधानेन एका दिनत्रयव्यापिनी कार्यशाला BAPS स्वामिनारायणसंस्कृतमहाविद्यालये ०८-०९-२०१७ तः१०-०९-२०१७ पर्यन्तम् आयोजिता। अस्यां कार्यशालायां विश्वविद्यालय सम्बद्ध-महाविद्यालयेभ्यः सप्तत्यधिकाः छात्राः भागमगृह्णन्। प्रथमे दिवसे कार्यशालासंयोजकेन श्रीगजेन्द्रपण्डामहोदयेन प्रास्ताविकं व्याख्यानं प्रदत्तम्। ततः साधुश्रुतिप्रकाशदासमहोदयेन जिज्ञासाधिकरणस्य पाङ्क्तमध्ययनम् अकार्षीत् । अस्यां कार्यशालायाम् दुतेषामपि विदुषां व्याख्यानानि समज़ायन्त । यथा डॉ. जानकीशरण आचार्यस्य अर्थविबोधेन सहः कण्ठपाठः तथा बी. उमामाहेश्वरी महोदयायाः भारतीयदर्शनेषु वेदान्तदर्शनम् ब्रह्मसूत्राणां महत्त्वञ्च इति विषये व्याख्यानम् अभवत्। कार्यशालायाः अन्तिमे दिवसे पूज्य स्वयम्प्रकाशस्वामिभिः सर्वेभ्यः आशीर्वादाः व्याहृताः। कार्यशालायाः अन्ते कार्यशालासंयोजकेन डॉ. जानकीशरण आचार्येण सर्वेषां कृते धन्यवादज्ञापनं कृतम्। अस्याः कार्यशालायाः संपूर्णं विवरण डॉ. जानकीशरण आचार्यस्य सविधे वर्तते।



## राज्यस्तरीयस्पर्धा

**२३ दिसम्बर २०१७ तमे दिनाङ्के स्पर्धाअनिरूद्धाचार्य सं.म.विद्यालये राज्यस्तरीया शास्त्रीयस्पर्धा अभवत्। तत्र सफलाः इमे छात्राः।**

१. अरुणपाण्डेयः – प्रथमं स्थानं (Quiz स्पर्धा)
२. राहुल झा – प्रथमं स्थानं (Quiz स्पर्धा)
३. अरुण पाण्डेय – प्रथमं स्थानं (समस्यापूर्तिस्पर्धा)
४. जयंपाढः – तृतीयं स्थानं – व्याकरणभाषणम्
५. राहुल झा – तृतीयं स्थानं – मीमांसाभाषणम्
६. अरुण पाण्डेय – तृतीयं स्थानं – न्यायभाषणम्
७. प्रकाश मिश्रः – तृतीयं स्थानं – वेदभाष्यभाषणम्
८. राजा जानी – तृतीयं स्थानं – जैनबौद्धभाषणम्
९. बालासरा रोहित – तृतीयं स्थानं– साहित्यभाषणम्

## अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा

अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा में गुजरात से श्रीसोमनाथ संस्कृत युनिवर्सिटी के दो छात्र राहुल कुमार झा और अरुण कुमार पांडेय को प्रथम क्रमाङ्क प्राप्त हुआ।

Report Source: **SOMJYOT**I- University Newsletter

## ब्रह्मर्षिधाम्नि समायोजिता पुराणेतिहासधर्मशास्त्रानुसन्धानकार्यशाला

वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयः किञ्च नडियादस्थ-ब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तसहकारेण २६.०९.२०१८ दिनाङ्कतः २८.०९.२०१८ पर्यन्तं ब्रह्मर्षिसंस्कार-धामपरिसरे विश्वविद्यालयस्य पुराणसङ्कायेन पुराणेतिधर्मशास्त्रानुसन्धानकार्यशाला समायोजि। एतस्याः संस्थायाः प्रमुखविश्वस्तैः पद्मश्रीडाह्याभाईशास्त्रिमहोदयैः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरणैः आचार्यैः गोपबन्धुमिश्रमहोदयैः प्रधानाचार्यचरैः डॉ. कृष्णप्रसादनिरौलामहोदयैः च स्वीयगरिममयोपस्थित्या कार्यशालेयं साफल्यं प्रापिता। वाल्मीकीयरामायणम् अधिकृत्य विविध-विद्वद्भिरस्यां कार्यशालायां सरसव्याख्यानानि अदियन्त।

साधुः श्रुतिप्रकाशदासः, डॉ. वसन्तकुमारभट्टः, डॉ. वसन्तभाईपरिखः, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमाररावल, डॉ. शान्तिकुमारपण्ड्या, श्रीजितेन्द्रकुमारव्यास, श्रीभद्रेशभाईव्यासः, डॉ. अमृतलाल भोगायता तथा च अन्ये विद्वांसः इमां कार्यशालां शास्त्रगर्भितैः स्वव्याख्यानैः व्यभूषयन्। विविधमहाविद्यालयेभ्यः प्राध्यापकाः अपि अत्र भागमगृह्णन् किञ्च छात्रैः अपि व्याख्यानश्रवणमक्रियत।



कार्यशालायाः उद्घाटनस्य कानिचन दृश्यानि









Report Source: **SOMJYOT**I- University Newsletter

## ब्रह्मर्षिधाम्नि आयोजिता व्याकरणशास्त्रकार्यशाला



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८ तः ३०.१२.२०१८ पर्यन्तं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये "धातूद्देश्यकाः प्रत्ययाः" इति विषयमाश्रित्य अभिनवा एका व्याकरणकार्याशाला समायोजिता आसीत्। अस्यां विविधमहाविद्यालयेभ्यः प्रायः ६२ विद्यार्थिनः अध्ययनाय समागताः। डॉ. पुष्पादीक्षितमहोदयया स्वीयया विशिष्ट्या शैल्या धातूद्देश्यकाः प्रत्ययाः इति विषये नितरामध्यापनकर्म अक्रियत। उद्घाटनसत्रे ब्रह्मर्षिसंस्कृतमहाविद्यालय-नडियादप्रमुखाः पूज्याः पद्मश्रीडाह्याभाई शास्त्रिणः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्याः आचार्याः गोपबन्धुमिश्रमहाभागाः, ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यचराः डॉ. कृष्णप्रसादनिरौलाः, प्रो. वसन्तकुमारभट्टाश्च उपस्थिताः भूत्वा प्रासङ्गिकोद्बोधनम् अकार्षुः। प्रो. विनोदकुमार झा अस्याः कार्याशालायाः प्रमुखसंयोजकः, डॉ. दिपेशकतिरा च संयोजकः आस्ताम्। स्थानीयसंयोजकरूपेण श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलाल भोगायता तथा च स्थानीयसहसंयोजकः डॉ. क्षितीश्वरनाथपाण्डेयः अविद्यत।



Report Source: **SOMJYOT**I- University Newsletter

# डिप्लोमापाठ्यक्रमप्रवेशविषये एकदिवसीयकार्यशाला




कार्यशालायाम् उपस्थितान् सम्बोधयन् परीक्षानियामकः डॉ योगेशपटेल

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे ०८-०८-२०१९ दिनाङ्के विश्वविद्यालयसंलग्नेषु पञ्चत्रिंशत् पदविकाभ्यासक्रमक्रेन्द्रेषु सञ्चालितानां विविधपदविकाभ्यासक्रमाणाम् २०१९-२० शैक्षणिकवर्षात् अधितन्त्रिप्रवेश-प्रक्रियां कर्तुम् एकदिवसीया कार्यशाला समायोजिता। कार्यशालायाः आरम्भे कुलपतिः प्रो. गोपबन्धुमिश्रः संस्कृतभाषायाः विकासार्थं किञ्च गुणवत्तायुक्तशिक्षणार्थम् उपस्थितान् सर्वान् समबोधयत्। कुलसचिवः डॉ. दशरथजादवः पदविकाभ्यासक्रमसम्बन्धितं प्राशासनिकं मार्गदर्शनम् अकरोत्। इन्फिनिटि- इन्फोवे इत्याख्यतन्त्रांशनिर्माणसंस्थया एतदनुगुणं तन्त्रांशं निर्माय कार्यशालायां समुपस्थितेभ्यः प्रतिभागिभ्यः अस्य तन्त्रांशस्य प्रदर्शनमपि कृत्वा विभिन्नप्रतिभागिकृतपृच्छायाः समाधानमपि व्यधायि। अस्यां कार्यशालायां त्रिंशदधिकाः संयोजकाः भागमग्रहीषुः। कार्यशालायाः सञ्चालनं किञ्च सम्पूर्तौ आभारविधिज्ञापनं परीक्षानियामकः डॉ. योगेशपटेलः अकरोत्। परीक्षाविभागस्य कर्मचारिणः कार्यशालायाः सफलतायै: सम्यग्रूपेण स्वदायित्वं निरवाक्षुः।

Report Source: **SOMJYOT**I- University Newsletter

# International Seminar




# सोमज्योतिः

**Shree Somnath Sanskrit University**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.shreesomnathsanskrituniversity.info

*University Newsletter*
Issue: **13** Month: **June** Year: **2016**


January 2016 To June 2016 सोमज्योतिः


## अष्टमवार्षिकपदवीदानसमारम्भः तथा अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः उद्घाटनसमारोहः




वामतः मञ्चस्थाः डॉ. दशरथजादवः, प्रो. अर्कनाथचौधरी, श्रीभूपेन्द्रसिंहचुडासमा, श्रीओ.पी.कोहली, श्रीजसाभाईबारडः, डॉ. रामकरणशर्मा, डॉ. पंकजजानी

### कुलपतिवाक्



श्रीसोमनाथसंस्कृतविश्वविद्यालयः निरन्तरं शैक्षिकप्रगतिपथे अग्रेसरतीति दृष्ट्वा मोमुदीति चेतः । राज्यसर्वकारप्रदत्तभौतिकसौविध्येन सह शैक्षणिककार्यजातमपि नितरां प्रशस्यम् । माननीयमुख्यमन्त्रिमहोदया २५ जनवरी २०१६ तिथौ छात्रावास-कुलपतिनिवासभवनयोः लोकार्पणं कृत्वा विश्वविद्यालयस्य प्रगत्यै अभिरुचिं प्रदर्शयामास । दीक्षान्तसमारोहेण सहैव ७-२-२०१६ तमे दिनाङ्के महामहिमशालिना राज्यपालेन श्रीओ.पी.कोहलीमहाभागेन अन्ताराष्ट्रियसंस्कृतसंगोष्ठ्याः त्रिदिवसात्मिकायाः समुद्घाटनं कृतम्। तस्मिन्नेव दिने मान्यशिक्षणमन्त्रिणा श्रीभूपेन्द्रसिंहचुडासमा-महोदयेन साकं महामहिमशालिना राज्यपालमहोदयेन भव्यविश्व-विद्यालयद्वारनिर्माणाय भूमिपूजनपूर्वकं शिलान्यासः कृतः । कार्यमिदं BAPS संस्थाया आर्थिकसहाय्येन क्रियमाणमस्ति । सत्रेऽस्मिन्नेव माननीयशिक्षाराज्यमन्त्रिण्या प्रो. वसुबेन-त्रिवेदिमहोदयया व्यासमूर्तेः अनावरणं विश्वविद्यालये विहितम्।

नेट स्लेट कृते विद्यार्थिनः विश्वविद्यालये प्रशिक्षिताः । पी.जी.डी.सी.ए कार्यशाला, शास्त्रीयकार्यशालाश्चास्मिन् वर्षे सम्पादिताः । तत्र महाविद्यालयप्राध्यापकानां सहभागित्वं प्रशंसनीयमासीत् । अन्ये च शैक्षणिककार्यक्रमाः समायोज्यन्ते इति शैक्षिकभौतिकदृष्ट्या द्रुतगत्या विश्वविद्यालयोऽग्रेसरति इति महान् प्रमोदः । कार्येऽस्मिन् प्राध्यापकाः प्रशासनिकविभागश्च नितरां सहयोगं प्रयच्छन्तीति ते अभिनन्दनीयाः सन्ति।

स्वस्तिश्रीविक्रमाब्द-२०७२ तमे संवत्सरे पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे अष्टमवार्षिकपदवीदान-समारम्भः अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः उद्घाटनसमारोहश्च सम्पन्नौ । अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया विविधाः कार्यक्रमाः अपि विश्वविद्यालयेन समायोजिताः आसन्।




विद्यावाचस्पतिः (D. Litt.) इति उपाधिं लभमाना डॉ. राजलक्ष्मीभट्ट

प्रतिसंवत्सरमिवास्मिन् संवत्सरेऽपि श्रीसोमनाथसंस्कृत-विश्वविद्यालयः ७-२-२०१६ तमे दिनाङ्के रविवासरे पूर्वाह्णे ११-०० वादने अष्टमवार्षिक-पदवीदानसमारम्भं समायोजितवान् । कार्यक्रमेऽस्मिन् अध्यक्षरूपेण सम्प्राप्ताः आसन् गुजरातराज्यस्य राज्यपाल-महोदयाः माननीयाः कुलाधिपतयश्च प्रो.ओमप्रकाशकोहली-महोदयाः । गुजरातराज्यस्य शिक्षणमन्त्रिणः श्रीभूपेन्द्रसिंह-चुडासमामहोदयाः प्रमुखातिथिरूपेण विराजमानाः आसन् । विशिष्टातिथिरूपेण सम्प्राप्ताः आसन् गुजरातराज्यस्य राज्यकक्षाकृषि-नागरिक-उड्डयनमन्त्रिणः श्री

(अनु. तृतीये पृष्ठे.....)

Report Source: **SOMJYOT**I- University Newsletter

# National Seminar



## समायोजिता 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति अखिलभारतीया त्रिदिवसीया दर्शनसङ्गोष्ठी




दर्शनसङ्गोष्ठ्यां प्रो. श्रीकिशोरमिश्रमहाभागाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन एकादशपदवीदानसमारम्भेण समम् एका त्रिदिवसीया अखिलभारतीया दर्शनसङ्गोष्ठी समायोजिता आसीत्। इयं सङ्गोष्ठी ०५.०२.२०१९ दिनाङ्के अस्य विश्वविद्यालयस्य कुलाधिपतिवर्याणां गुजरातराज्यस्य राज्यपालमहोदयानां च श्रीमतां ओम्प्रकाशकोहलीहर्याणां किञ्च कुलपतिवर्याणां श्रीमतां प्रो. गोपबन्धुमिश्रवर्याणां उपस्थितौ समारब्धा। ०५.०२.२०१९ दिनाङ्के पूर्वाह्णे राज्यपालमहोदयेन अस्याः सङ्गोष्ठ्याः उद्घाटनं कृतम्। तदनु अपराह्णे २.३० वादने अस्याः प्रथमं विशिष्टं सत्रं प्रावर्तत। अस्यां सङ्गोष्ठ्याम् आहत्य अष्टौ सत्राणि आसन् यत्र विशिष्टव्याख्यानस्य सत्रद्वयं, शोधपत्रवाचनस्य सत्रषट्कं चासीत्। प्रत्येकमपि सत्रे अध्यक्षः, सञ्चालकः, संवाददाता चेति व्यवस्था कल्पिता आसीत्। संवाददात्रा प्रत्येकमपि सत्रे प्रतिपादितानां विषयाणां सङ्क्षेपेण वृत्तकथनमकारि। अस्यां सङ्गोष्ठ्यां प्रायः पञ्चाशदधिकाः विपश्चिदपश्चिमाः विद्वांसः भागमगृह्णन्। 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति विषयं केन्द्रीकृत्य प्रवृत्तायाम् अस्यां सङ्गोष्ठ्यां पटनाविश्वविद्यालये संस्कृतविभागाध्यक्षचराः प्रो. उमाशङ्करशर्माणः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. राजारामशुक्लः, काशीहिन्दूविश्वविद्यालयस्य कलासङ्कायाध्यक्षः प्रो. श्रीकिशोरमिश्रः, उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः प्रो. गोपालकृष्णदाशः, गुजरात-विश्वविद्यालयस्य भाषाभवनाध्यक्षचरः प्रो. वसन्तकुमारभट्टः, काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्म-विज्ञानसङ्कायाध्यक्षचरः प्रो. कृष्णकान्तशर्मा इतरे च विद्वांसः उपस्थाय दर्शनशास्त्रेषु निहितानां गूढतत्त्वानां सूक्ष्मेक्षिकया विश्लेषणं विधाय स्वविषयान् सरलतया प्रतिपादितवन्तः। सङ्गोष्ठ्याः अङ्गतया ०५.०२.२०१९ दिनाङ्के सायं सांस्कृतिकार्यक्रमस्य आयोजनम् अभूत् यत्र नृत्य-गीत-नाटकादिकार्यक्रमाः समायोजिताः।



कविसम्मेलनस्य किञ्चन दृश्यम्




वाक्यार्थं प्रस्तुवन्तौ पण्ड्यारिधम-जोषीध्रुविनौ

सङ्गोष्ठ्याः द्वितीये दिने सायं परम्परानुगतशैलीमाश्रित्य शास्त्रार्थविचारः प्रवृत्तः यत्र छात्रैः पूर्वपक्षसिद्धान्तपक्षरीत्या शास्त्रार्थः प्रास्तावि। तत्र प्रथमः शास्त्रार्थविचारः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य दर्शनविभागस्य छात्राभ्यां जोशीध्रुविन-पण्ड्यारिधमाभ्यां 'जिज्ञासाधिकरणम्' इति विषयमवलम्ब्य प्रस्तुतः। द्वितीयशास्त्रार्थविचारश्च विश्वविद्यालयसंलग्नस्य सारङ्गपुररस्थस्य बी.ए.पी.एस.स्वामिनारायणसंस्कृतमहाविद्यालयस्य छात्राभ्यां अक्षरसागराभ्यां स्वामिनारायण-सिद्धान्तानुगुणं 'जिज्ञासाधिकरणम्' इति विषयमादाय प्रस्तुतः। ०७.०२.२०१९ दिनाङ्के अस्याः सङ्गोष्ठ्याः अङ्गतया एकं कविसम्मेलनमपि आयोजितं यत्र विविधप्रान्तेभ्यः गुजरातराज्याच्च समागतैः कविवरैः स्वरचितकाव्यपाठः प्रस्तुतः। इत्थम् अस्यां त्रिदिवसात्मिकायाम् अखिलभारतीयदर्शनसङ्गोष्ठ्यां बहुषु विषयेषु आस्तिकनास्तिकव्यावहारिकसामाजिकेत्यादिविषयेषु गभीरतया संवादः जातः। शोधपत्राणां प्रस्तुतिसमये तद्विषयिणी जिज्ञासा, तन्निवारणादिकमपि सुष्ठु सम्पन्नम्।

अस्याः सङ्गोष्ठ्याः समापनसमारोहः ०७.०२.२०१९ दिनाङ्के अपराह्णे ३.३० वादने समजायत। यत्र सभाध्यक्षरूपेण विश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रमहाभागः, मुख्यातिथिः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सदस्यसचिवचरः प्रो. श्रीकिशोरमिश्रः, सारस्वतातिथिरूपेण उत्कलविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः आचार्याः गोपालकृष्णदाशः, विश्वविद्यालयस्य कार्यकारिकुलसचिवः डॉ. दशरथजादवः, विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः, कर्मचारिणः अन्तेवासिनश्च समुपातिष्ठन्। अस्य समापनसत्रस्य समग्रं सञ्चालनं डॉ. जानकीशरण आचार्यः अकरोत्। अस्याः दर्शनसङ्गोष्ठ्याः संयोजिकारूपेण डॉ. उमा महेश्वरी कार्यमकरोत्। इत्थम् इयं सङ्गोष्ठी 'भारतीयदर्शनेषु सैद्धान्तिकपक्षाः' इति स्वविषये साफल्यं प्राप्नोत्।




समापनसमारोहे भाषमाणः प्रो. गोपबन्धुमिश्रवर्यः




दर्शनसङ्गोष्ठ्याः सांस्कृतिककार्यक्रमे नृत्यगीतनाटकादिप्रस्तुवद्भिः छात्रैः सह कुलपतिः इतरे च प्राध्यापकाः



सांस्कृतिककार्यक्रमस्य दृश्यमेकम्

*Somjyoti (The University News Letter – Issue 19, January to March-2019, Page – 06*

Report Source: **SOMJYOT**I- University Newsletter

# "संस्कृतसाहित्ये वागर्थविचारः" इति विषये सम्पन्ना राष्ट्रिया सङ्गोष्ठी

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यसङ्कायेन १९-२० सितम्बर् २०१९ दिनाङ्कयोः विश्वविद्यालयपरिसरे "संस्कृतसाहित्ये वागर्थविचारः" इति विषयमादाय एका अखिलभारतीयसाहित्यशास्त्रीया सङ्गोष्ठी समायोजिता। नैकविद्वज्जनसमन्वितायाम् अस्यां सङ्गोष्ठ्याम् प्राध्यापकानाम् अष्टाविंशतिः शोधपत्रवाचनमकरोत् किञ्च विविधेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यश्च समागताः पञ्चाशीत्यधिकाः प्राध्यापकाः शोधच्छात्राश्च प्रतिभागिरूपेण भागमग्रहीषुः। अस्याः सङ्गोष्ठ्यां संयोजकः साहित्यसङ्कायाध्यक्षः प्रो. महेन्द्रकुमार दवे आसीत्।


उद्घाटनसत्रस्य किञ्चन दृश्यम्

अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रं १९-०९-२०१९ दिनाङ्के पूर्वाह्णे एकादशवादने समवर्तत। सङ्गोष्ठ्या उद्घाटकरूपेण गुजरात-साहित्य-अकादम्याः अध्यक्षः पद्मश्रीः डॉ. विष्णुपण्डया महोदयः विशेषरूपेण उपस्थितः आसीत्। तेन स्ववक्तव्ये उक्तं यत् अयं विश्वविद्यालयः संस्कृतक्षेत्रे उत्तमं कार्यं विदधानो वर्तते, अतः अयं विश्वविद्यालयः गुजरातस्य प्राचीनवल्लभीविद्यापीठसदृशां ख्यातिं प्राप्नुयात्। उपस्थितान् छात्रान् अभिलक्ष्य तेनोभाणि यत् विद्यार्थिजीवने स-चतुष्टयम् अनुकरणीयं वर्तते। एतेन सङ्घर्ष-सङ्कल्प-सामर्थ्य-सृजनाख्यसचतुष्टयेन जीवने अवश्यं साफल्यं प्राप्यते। पद्मश्रीः पण्ड्यावर्यः गुजरात-साहित्य-अकादमीपक्षतः प्रकाशितानाम् अप्रकाशितपाण्डुलिपिग्रन्थानां विषयेऽपि चर्चामकरोत्। उद्घाटनसत्रे सारस्वतातिथिरूपेण वदता जबलपुरस्थराणीदुर्गावतीविश्वविद्यालयस्य प्राप्तावकाशेन प्राध्यापकेन आचार्येण रहसविहारिद्विवेदिना विस्तृतरूपेण समीक्षापुरःसरं संस्कृतसाहित्यस्य परिचयः उपस्थापितः। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः उद्घाटनसत्रे स्वकीयाध्यक्षीयभाषणेन सर्वान् समबोधयत्।


सम्मेलने उपस्थिताः महानुभावाः प्रतिभागिनः, छात्राश्च

दिवसद्वयव्यापिन्याः अस्याः सङ्गोष्ठ्याः अङ्गतया १९-०९-२०१९ दिनाङ्के सायङ्काले कविसमवायः समायोजितः। प्रो. शिवरामशर्मा, डॉ. बलराम शुक्लः, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. अमृतलाल भोगायता, डॉ. कालिदास ठाकरः, प्रो. रहसविहारी द्विवेदी, प्रो. मनुलता, डॉ. रवीन्द्र खाण्डवाला, डॉ. भरत बी. परमार इत्यादिभिः कविभिः साहित्यरसगुम्फिताः स्वकीयरचनाः प्रस्तुताः। अस्मिन् कविसम्मेलने माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः अपि स्वकाव्यपाठेन उपस्थितान् सर्वान् अतोषयत्। कविसम्मेलनस्य मञ्चसञ्चालनं गुजरातराज्यस्य सुप्रसिद्धः रससिद्धः कविवरः डॉ. अमृतलालभोगायता अत्यन्तं लालित्यपूर्णशैल्या अकरोत्।



समापनकार्यक्रमस्य दृश्यमेकम्


कविसम्मेलनस्य दृश्यमेकम्

२०-०९-२०१९ दिनाङ्के अपराह्णे सार्धत्रिवादने अस्याः सङ्गोष्ठ्याः सम्पूर्तिकार्यक्रमः समायोजितः, यत्र काशीहिन्दूविश्वविद्यालयस्य साहित्यविद्या-धर्मविज्ञानसङ्कायस्य साहित्यविभागे प्रो. शिवरामशर्मा सारस्वतातिथिरूपेण उपस्थाय कुञ्चिकाभाषणम् अकरोत्। सुधिभिः प्रशंसिते स्वकीयोद्बोधने तेन संस्कृतसाहित्ये वागर्थविचारविषये विभिन्नाचार्याणां मतानि उद्धृतानि। कुलपतिः प्रो. गोपबन्धुमिश्रः अस्मिन् सम्पूर्तिसत्रेऽपि स्वकीयाध्यक्षीयोद्बोधनेन सर्वान् प्राचूचुदत्। कार्यक्रमान्ते साहित्यसङ्कायाध्यक्षः किञ्च अस्याः सङ्गोष्ठ्याः संयोजकः प्रो. महेन्द्रकुमारदवे आभारविधिं प्राकाशयत्। अस्मिन् सम्पूर्तिसत्रे मञ्चसञ्चालनं दर्शनविभागप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।

Report Source: **SOMJYOT**I- University Newsletter

# Sanskrit Kavi Sammelan (07-02-2016)






संस्कृतकविसम्मेलने उपस्थिताः मञ्चस्थाः कवयः

## संस्कृतकविसम्मेलनम्

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम् तथा गुजरात- साहित्य- अकादमी- गान्धीनगरम् इत्यनयोः संयुक्तोपक्रमेण स्वस्तिश्रीविक्रमाब्द २०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे सायं संस्कृतकविसम्मेलनं समायोजितमासीत् । सन्दर्भेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयश्च स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादं च कारितवन्तः । तत्र निमन्त्रिताः कवयः इत्थम् आसन् - प्रो.रामकरणशर्म, प्रो.कमलेशदत्तत्रिपाठी, प्रो.अम्बालालप्रजापति, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. मिथिलाप्रसादत्रिपाठी, प्रो.रामलखनपाण्डेयः, प्रो. हर्षदेवमाधवः, डॉ. जयप्रकाशनारायणद्विवेदी, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. शिवजीउपाध्यायः,. डॉ. अमृतलालभोगायता, डॉ. उमाकान्तचतुर्वेदी, प्रो.रामकुमारशर्म, डॉ. उमारमणझा, प्रो.रमेशकुमारपाण्डेयः, डॉ. शङ्करजीझा, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो.उमाशङ्करशर्म, डॉ. बलदेवानन्दसागरः, श्री भाग्येशझा, प्रो.राजेन्द्रनाणावटी, प्रो.रामसुमेरयादवः च । अस्य कार्यक्रमस्य सञ्चालनं डॉ. नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः।



Report Source: **SOMJYOT**I- University Newsletter


श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
Three day International Conference on Tradition of Commentaries and the Dynamics of Knowledge
अन्ताराष्ट्रियपरिसंवादः
११ तः १३ फरवरी, २०२०
विषयः- भाष्यपरम्परा ज्ञानप्रवाहश्च
कविसम्मेलनम्
श्री सोमनाथ संस्कृत विश्वविद्यालयम् वेरावलम

# Sardar Vallabhbhai Patel's resolution for Sanskrit Vidyapeeth



શ્રી સોમનાથ મંદિરમાં
કંડારાયેલી પ્રશસ્તિ
ચિત્રમાં પૂજાચાર્ય શ્રી ધનંજય દવે
પ્રશસ્તિ આગળ ઊભેલા જણાય છે.

## ભગવાન સોમનાથની પ્રશસ્તિઓ

પ્રા. જે. ડી. પરમાર, ટ્રસ્ટી - શ્રી સોમનાથ ટ્રસ્ટ

પ્રભાસપાટણમાં આવેલું ભગવાન સોમનાથનું મંદિર પવિત્ર યાત્રાધામ છે અને ઐતિહાસિક મહત્ત્વ ધરાવે છે. તેનું માહાત્મ્ય છેક વેદકાળથી ગવાતું આવ્યું છે. ઋગ્વેદના ખિલસૂકતોમાં તેની સ્તુતિ મળે છે. મહાભારત અ. ૩૫, સ્કંદપુરાણ અ.૭ ઇત્યાદિમાં સોમનાથના પ્રાદુર્ભાવની કથા આપી તેની સ્તુતિ કરી છે. શિવપુરાણ-જ્ઞાનસંહિતામાં દ્વાદશ જ્યોતિર્લિંગ ની સ્તુતિમાં સોમનાથને પ્રથમ સ્થાન આપ્યું છે. સ્કંદપુરાણ-પ્રભાસખંડમાં તો સંપૂર્ણ ક્ષેત્રનું વિસ્તૃત માહાત્મ્ય વર્ણવ્યું છે. આમ પ્રાચીન કાળથી જ ભગવાન શિવની સ્તુતિઓ રચાતી આવી છે.

પરંતુ ખ્રિસ્તની અગિયારમી સદીમાં ભગવાન સોમનાથનાં મંદિરનો વિધર્મીઓના હાથે ધ્વંશ થયા પછી તેનું નવ-નિર્માણ થયું, જિર્ણોધ્ધાર થયો, વિસ્તૃતીકરણ થયું તે તે પ્રસંગની સ્મૃતિ જળવાઈ રહે તે હેતુથી પ્રશસ્તિઓ રચાઈ. આવી પ્રાચીન પ્રશસ્તિઓમાંથી ઉપલબ્ધ મહત્ત્વની પ્રશસ્તિઓનો પરિચય આપી સ્વાતંત્ર્યોત્તર નવનિર્માણ સમયની વિવિધ પ્રશસ્તિઓનો પણ ટૂંકો પરિચય આપવાનો અહીં પ્રયાસ કર્યો છે.

### (૧) ગંડ શ્રીભાવબૃહસ્પતિની પ્રશસ્તિઃ

પ્રભાસપાટણમાં ભદ્રકાલિના મંદિરમાંથી વલ્લભી સંવત ૮૫૦ (વિ.સં.૧૨૨૫)નો શિલાલેખ મળ્યો છે. આ શિલાલેખ રાજા કુમારપાળના સમયનો છે. સંસ્કૃત પદ્યમાં નાગરી લિપિમાં છે. ૨૮' x ૧૮' ચોરસ ઇંચનાં માપની કાળી શિલામાં કોતરેલો છે. તેમાં ચોપન પંક્તિઓ છે, જેમાં ૭૬ શ્લોકો છે.

ભાવ બૃહસ્પતિના કહેવાથી મહારાજા કુમારપાળે જીર્ણ થયેલું સોમનાથ મંદિર ફરી બંધાવ્યું. એવો પ્રશસ્તિમાં સ્પષ્ટ ઉલ્લેખ છે. ચાલુક્ય (સોલંકી) રાજા કુમારપાળ ઈ.સ. ૧૧૪૪માં અણહિલવાડ પાટણની ગાદીએ આવ્યા. તેમણે આચાર્ય ભાવ બૃહસ્પતિને પ્રભાસ મોકલ્યા. તેમણે ઈ.સ. ૧૧૬૯માં કૈલાસ જેવા ભવ્ય " મેરુ પ્રાસાદ" ની રચના કરાવી. તે સમયે સમગ્ર પ્રભાસપાટણની પુનર્રચના પણ કરાવી. મંદિરની ઉત્તરે અને દક્ષિણે મજબૂત ગઢ બંધાવ્યો. ગૌરી, કપર્દી, ભીમેશ્વર, સિધ્ધેશ્વરનાં દેવાલયો બંધાવ્યાં. મહાદેવના આસનસ્થાનને મંડુકાકાર કરાવી તેની સાથે ચાંદીની જલવાહિની જોડાવી. ત્રણ મનુષ્યોની ઊંચાઈ જેટલી ઊંચી પાપવિમોચન દેવની પ્રતિમા કરાવી. રાજાઓ માટે સભાખંડ, બ્રાહ્મણો માટે નિવાસ્થાનો, યાત્રિકો માટે નદી ઉપર ઘાટ, લોકો માટે બે વાવ વગેરે પુણ્યકાર્યો કરાવ્યાં. મહારાજા કુમારપાળ અને ગંડ શ્રીભાવબૃહસ્પતિની અહીં મહતી પ્રશંસા કરવામાં આવી છે. આ પ્રશસ્તિ Historical Inscriptions of Gujarat Part-II માં પ્રકાશિત થયેલી છે.

### (૨) શ્રીધર પ્રશસ્તિ

પ્રભાસપાટણના મોટા દરવાજા પાસેથી મળેલા ૨૬' x ૨૬' ચોરસ ઈંચ માપના પથ્થરમાં સંસ્કૃત ભાષામાં દેવનાગરી લિપિમાં ૪૭ પંક્તિઓ કોતરેલી છે. આ શિલાલેખની સાલ વિ.સં.૧૨૭૩ છે. આ પ્રશસ્તિમાં ઉલ્લેખ છે કે રાજા કુમારપાળનું અવસાન થયું તે પછી અજયદેવ રાજગાદી પર આવ્યા. તેમના પછી મૂળરાજ રાજા ગાદીએ આવ્યા. રાજા અજયદેવના નાનાભાઈ રાજવીશ્રી ભીમદેવનો પ્રતાપ વિશાળ હતો. તેમણે સોમનાથ મંદિરમાં મેઘધ્વનિ (મેઘનાદ) નામનો વિશાળ મંડપ બંધાવ્યો. રાજા ભીમદેવના પ્રધાન શ્રીધરે ભગવાન શિવ અને વિષ્ણુનાં મંદિરો બંધાવ્યાં હતાં. શ્રીધર વડનગરો નાગર બ્રાહ્મણ હતો. તે સોમનાથ પાટણમાં ગુજરાતના રાજાઓનો સૂબો હતો. આ પ્રશસ્તિમાં શ્રીધરમંત્રી અને ચાલુક્ય રાજાઓની ભૂરિ પ્રશંસા કરવામાં આવી છે. આ પ્રશસ્તિ Historical Inscriptions of Gujarat Part-III માં પ્રકાશિત થયેલી છે.

### (૩) ગંડ શ્રીત્રિપુરાન્તક પ્રશસ્તિ

વિ.સં. ૧૩૪૩ની સારંગદેવ રાજાના સમયની એક પ્રશસ્તિ મળી છે તે સોમનાથની તત્કાલીન સ્થિતિ અને વૈભવની પરિચાયક

છે. ડોન જોન ડી કેસ્ટ્રો નામના યુરોપિયને સોમનાથ પાટણથી આ પ્રશસ્તિ પોર્ટુગલમાં આવેલા સીન્ટ્રામાં લઈ જઈ પોતાના બગીચામાં રાખી હતી. આ પ્રશસ્તિ આજે સીન્ટ્રા પ્રશસ્તિને નામે પ્રસિધ્ધ છે. આ પ્રશસ્તિ ૪૨' x ૨૦' ચોરસ ઈંચનાં માપના પથ્થર ઉપર કોતરેલી છે. તેમાં છાસઠ પંક્તિઓમાં ૭૬ પદ્યો છે. આ પ્રશસ્તિ ઈતિહાસમાં ત્રિપુરાન્તકેશ્વર પ્રશસ્તિને નામે પ્રસિદ્ધ છે.

આ પ્રશસ્તિમાં વિશ્વમલ્લ (વિશળદેવ), અર્જુનદેવ અને સારંગદેવનાં નામો અને લખાણ છે. તેમાં કહ્યું છે કે ભગવાન શંકરે પાશુપતાચાર્ય ભગવાન લકુલીશનો અવતાર લીધો હતો. તેમના શિષ્યોનાં ચાર ગોત્રોમાંથી એક ગોત્રમાં કાર્તિકરાશિ થયા. તેમની શિષ્યપરંપરામાં ત્રિપુરાન્તક થયા. તે દેવપત્તન (પ્રભાસપાટણ)માં આવ્યા. ગંડ શ્રીભાવબૃહસ્પતિએ તેને છઠ્ઠા મહંત કર્યા. ગંડ ત્રિપરાન્તકે સોમેશ્વર (સોમનાથ)નાં મંડપની ઉત્તરે જીર્ણ ઘટિકાના સ્થાનની પાસે શંકરના પાંચમુખથી જાણે અધિષ્ઠિત હોય એવા પાંચ શિવાલય કરાવ્યાં. આ પાંચેના વચલા ભાગમાં ગૌરક્ષક, ભૈરવ, હનુમાન, સરસ્વતી અને સિદ્ધિવિનાયકનાં સ્થાનો કરાવ્યાં. ઉત્તરના દ્વાર સામે સુંદર સ્તંભો ઉપર તોરણ કરાવ્યું. સં. ૧૩૪૩નાં માઘ સુદિ પાંચમ - વસંતપંચમી- ને સોમવારે લિંગપ્રતિષ્ઠાનો મહોત્સવ થયો હતો એમ છેવટે ગદ્યમાં લખેલું છે.

આ પ્રશસ્તિના શ્લોકો વાંચતા મહાકાવ્ય વાંચતાં હોઈએ તેવું લાગે છે. આ પ્રશસ્તિ Historical Inscriptions of Gujarat - Part III માં પ્રકાશિત થયેલી છે.

## (૪) શ્રી સોમસ્તવરાજ

ભારત સ્વતંત્ર થયા પછી ૧૩ નવેમ્બર,૧૯૪૭ના રોજ ભારતરત્ન, લોહપુરુષ, સરદાર વલ્લભભાઈ પટેલ પ્રભાસમાં પધાર્યા ત્યારે ભગવાન સોમનાથના મંદિરના નવનિર્માણની પ્રતિજ્ઞા કરી. શ્રી કનૈયાલાલ માણેકલાલ મુનશી અને મહારાજા શ્રી દિગ્વિજયસિંહજી જામસાહેબના અથાગ પ્રયત્નોથી સૌ પ્રથમ ગર્ભગૃહનું નિર્માણ કરવામાં આવ્યું. તેમાં વિ.સં. ૨૦૦૭ના વૈશાખમાસની શુકલપંચમીને શુભદિને ભારતના રાષ્ટ્રપતિ ડૉ. રાજેન્દ્રપ્રસાદના શુભહસ્તે શિવલિંગની પ્રતિષ્ઠા કરવામાં આવી. આ શુભપ્રસંગની સ્મૃતિમાં શ્રી જયન્તકૃષ્ણ હરિકૃષ્ણ દવે એ "શ્રી સોમસ્તવરાજઃ" નામની ૪૧ શ્લોકોમાં પ્રશસ્તિ રચી. તેમાં ૧ થી ૧૭ માં પુરાણોક્ત ઈતિહાસ, શ્લોક ૧૮ થી ૨૯ માં મંદિરની ઐતિહાસિક વિગતો અને શ્લોક ૩૦ થી ૪૦ માં સ્વાતંત્ર્યપ્રાપ્તિ પછી થયેલા મંદિરના નવનિર્માણની હકિકતો દર્શાવી છે. શ્લોક ૪૧માં આશીર્વચન છે. આ પ્રશસ્તિ વિ.સં. ૨૦૧૦ માં ચૈત્ર સુદિ નોમને દિવસે, ભારતીય વિદ્યાભવન, મુંબઈ દ્વારા પ્રકાશિત કરવામાં આવી છે.

## (૫) શ્રી સોમનાથ પ્રશસ્તિ

શ્રી સોમનાથ મહાદેવના નૂતનમંદિરનાં નિર્માણમાં ગર્ભગૃહની રચના પછી તેના ઉપર નવ મજલાવાળું ૧૫૫ ફૂટ ઊંચુ શિખર બાંધવામાં આવ્યું. તેની આગળ ત્રણ મજલાવાળો ભવ્ય સભામંડપ બાંધવામાં આવ્યો. ત્યારે ૧૩મી મે ૧૯૬૫ના શુભદિને ટ્રસ્ટના તત્કાલીન અધ્યક્ષ મહારાજા જામસાહેબના શુભહસ્તે મંદિરના શિખર ઉપર કલશારોહણ અને ધ્વજારોપણ કરવામાં આવ્યું. આ શુભ પ્રસંગની સ્મૃતિમાં સંપૂર્ણ વિગતો સાથે પ્રશસ્તિ રચવાની જવાબદારી શ્રી સોમનાથ ટ્રસ્ટી મંડળ તરફથી ટ્રસ્ટીશ્રી રાજમાતા ગુલાબકુંવરબાને સોંપવામાં આવી. તેમણે શ્રી ભાઈશંકર પુરોહિત પાસે પ્રશસ્તિ તૈયાર કરાવી. ૭૮ શ્લોકોમાં રચાયેલી આ સ્તુતિમાં પૌરાણિક, ઐતિહાસિક અને નૂતન મંદિર નિર્માણની વિગતોને આવરી લેવામાં આવી છે. આ સ્તુતિ વિ. સં. ૨૦૨૭ માં રચાઈ હતી. તેને વિ.સં. ૨૦૨૮ માં અક્ષયતૃતીયાને દિવસે પ્રકાશિત કરવામાં આવી.

## (૬) શ્રી સોમનાથ પ્રશસ્તિ :

હાલમાં ભગવાન સોમનાથ મહાદેવના મંદિરમાં ગર્ભગૃહ અને સભામંડપની વચ્ચે આવેલા અંતરાલમાં આરસની તખ્તીમાં એક પ્રશસ્તિ કોતરાવેલી જોવામાં આવે છે. નૂતનમંદિરમાં શિલાલેખ રૂપે સ્થાન પામેલી આ પ્રશસ્તિમાં તેના રચયિતાનો પરિચય કે તેનો રચનાકાળ દર્શાવ્યો નથી. શ્રી સોમનાથ ટ્રસ્ટના ભૂતપૂર્વ મેનેજર અને માનદમંત્રી શ્રી કુંદનલાલ ભટ્ટના જણાવ્યા અનુસાર આ પ્રશસ્તિ શ્રી ચંદ્રકાન્ત શાસ્ત્રી રચિત છે.

કોતરાવેલી પ્રશસ્તિમાં ૬૭ શ્લોકો છે. સંસ્કૃતભાષામાં લખાયેલી આ પ્રશસ્તિ પદ્યમાં દેવનાગરી લિપિમાં છે. પ્રથમ બે શ્લોકોમાં શિવસ્તુતિ છે. ત્રીજા શ્લોકમાં સાગરને અને ચોથા શ્લોકમાં પ્રાચી સરસ્વતીને સોમનાથના ચરણોનું પ્રક્ષાલન કરવા આવતાં વર્ણવ્યાં છે, તે સુંદર કલ્પના છે. તે પછીના બે શ્લોકોમાં પ્રભાસમાહાત્મ્ય વર્ણવાયું છે. સાતમા અને આઠમા શ્લોકામાં દક્ષશાપમુકત ચંદ્રે સોમનાથનું મંદિર સોનાનું બંધાવ્યાનો ઉલ્લેખ કરી દક્ષશાપની પૌરાણિક કથા સંક્ષેપમાં કહી છે. તે પછી દશાનનદ્વારા રજતમંદિર અને શ્રીકૃષ્ણ દ્વારા ચંદનકાષ્ઠમંદિર બંધાવ્યાનું કહેવામાં આવ્યું છે. શ્લોક ૧૩ સુધી સોમનાથનું માહાત્મ્ય દર્શાવી તે પછી શ્લોક ૩૮ સુધી સોમનાથના પ્રાચીન ઈતિહાસથી માંડીને સરદાર વલ્લભભાઈની સોમનાથ મંદિરના નવનિર્માણની પ્રતિજ્ઞા સુધીનો ઈતિહાસ આલેખવામાં આવ્યો છે. ૩૯મા શ્લોકમાં મંદિરના નવનિર્માણ માટે જાહેર થયેલા દાનોનો ઉલ્લેખ કર્યો છે. તે પછી મંદિરના શિલારોપણથી માંડી નવનિર્માણકાર્ય તેમ જ તત્કાલીન ટ્રસ્ટીમંડળના સભ્યોની વિગતો આપી છે. અન્ય મંદિરો અને મૂર્તિઓની સ્થાપનાનો ઉલ્લેખ પણ કર્યો છે. શ્રી કૃષ્ણ અને શ્રી બલરામજીની પ્રતિમાઓ દેહોત્સર્ગમાં સ્થાપવામાં આવી તેમ જ સરદાર વલ્લભભાઈની પ્રતિમા સ્થાપી શ્રી રવિશંકર મહારાજના શુભહસ્તે અનાવરણ કરવામાં આવ્યું તેનો પણ ઉલ્લેખ છે. શ્લોક ૬૫માં સંસ્કૃત પાઠશાળાની સ્થાપનાનો ઉલ્લેખ કરી ૬૬ અને ૬૭મા શ્લોકોમાં "ભગવાન સોમનાથ રક્ષણ કરો" એમ આશીર્વચન છે. □□

# श्री સોમનાથ મંદિરની દિવાલ ઉપર કંડારાયેલી પ્રશસ્તિનો સંપૂર્ણ પાઠ

। ॐ श्री गणेशायः नमः ।

## श्री सोमनाथ प्रशस्तिः ।

जगद्‌द्रुमस्याङ्कुरबीजतत्त्वमनन्तशक्तेर्निधिसारसत्त्वम् ।
ब्रह्माण्डपिण्डं सुहिरण्यगर्भं ज्योतिर्मयं लिङ्गतनुं नमामि ॥१॥
यस्या ऋते शून्यमयी त्रिलोकी नालं परं सा त्रिगुणात्मकार्ये ।
अन्योन्य सापेक्ष्यसुप्रीतिजुष्टावुमामहेशौ सततं नमामि ॥२॥
महार्णवो गम्भीरगर्जनेन संस्तौति भक्त्या प्रभुचन्द्रचूडम् ।
अहर्निशं क्षालयतीह सिन्धुः श्री सोमानाथस्य पदारविन्दम् ॥३॥
सरस्वतीप्राच्यप्रवाहपुष्टा ह्यभ्येति वारांनिधिमत्र पुण्या ।
आयान्ति सर्वाः श्रुतयः समेत्य ज्योतिर्मयेष्वादितमं प्रणन्तुम् ॥४॥
कृष्णेन गौराङ्गिरसो मुनेस्तु सम्पूर्णयोगः पठितो यदत्र ।
लीलावसाने परया सुभक्त्या स्वङ्गीकृतं तेन प्रभासतीर्थम् ॥५॥
पार्थः सुभद्रामहरत् सुभद्रां कृष्णाज्ञया शम्भुप्रसादप्रीत्या ।
अमोघवांछाफलसिद्धिहेतुः कृष्णेक्षणं शङ्करतीर्थवासः ॥६॥
सुधाप्रभा श्रीर्हिमरश्मिसोमो दक्षस्य शापात्क्षयतापतप्तः ।
सोमेश्वरं प्राप्य विमुक्तशापः प्रभासतीर्थं किल तीर्थराजः ॥७॥
कलाकलापाङ्कितभित्तिभव्यमुत्तुङ्गशृङ्गं ध्वजतोरणाढयम् ।
निर्मापितं मन्दिरमिन्दुनात्र धातुः कलायाः प्रथितप्रमाणम् ॥८॥
गङ्गोर्मिरेखाञ्चितशेखराय कर्पूरगौराय महेश्वराय ।
कैलासगौरं रजतस्य हर्म्यं समर्पयामास दशाननोऽस्मै ॥९॥
उत्कीर्णनानाकृतिमञ्जुपुञ्जं सुदीर्घदीर्घाभीरलङ्कृतश्च श्र
निर्मापितं चन्दनमन्दिरं श्रीकृष्णेन सोमेश्वरतुष्टि हेतु ः ॥१०॥
ऐश्वर्ययुक्तं धनरत्नपूर्णमासीन्महन्मन्दिरमत्र शम्भोः ।
अदौ शताब्दौ खुलु विक्रमस्य सुनिश्चितं प्राच्यविदो वदन्ति ॥११॥
रत्नैर्हिरण्यैर्बहुभूषणौघैरानर्च देवं नयतान्त्रिवर्गः ।
चलाचला वै नितराभुवास शिवेव सोमेश्वरसंश्रिता सा ॥१२॥
अहो विचित्रा नियतेर्गतिर्वै चित्रं न किं ताण्डवनृत्यजालम् ।
निर्माणनिर्वाणसमानभावो नर्द्वंद्वचित्तो जगदादिहेतुः ॥१३॥
मदान्ध्यधूर्णो धनलाभलुब्धो महंमदारव्यो गजनीनिवासी ।

निपात्य हर्म्यं प्रतिमां बभञ्ज नेत्राष्टशून्याब्जगविक्रमाब्दे ॥१४॥
ब्रह्माण्डसंव्याप्तनिगूढसत्वं ज्योतिर्मयं सर्वगतं स्फुरन्तम् ।
वेद्यो हरि यं न प्रभू विभातुं हतं सुलिङ्गं कथमात्मलिङ्गम् ॥१५॥
रक्षाव्रता वीरगतिं गताये ह्युत्सर्गनिष्ठा व्रतधर्ममूलाः ।
तेषामलं गायति कीर्तिगानं हिरण्यशृङ्गं जलधिर्ध्वजश्च ॥१६॥
चालुक्यवंशप्रभवो नरेन्द्रः श्रीभीमदेवः किल भीमदेवम् ।
प्रासादपुष्पैः समतोषयद्यं कुमारपालोऽपि कुमारपालम् ॥१७॥
खषद्द्विसत्त्वाब्दगतेऽन्यभीमो विनिर्ममौ मण्डपमेघनादम् ।
दुर्गं द्रढं श्रीनरसिंहभूपः शून्याद्विकाण्डैकगविक्रमाब्दे ॥१८॥
अथेन्द्रप्रस्थे बत हिन्दुराज्ये सूर्यः कुभाग्यान्निलयं जगाम ।
उत्कर्षह्रासौ नियतेरधीनो तन्मार्जितुं को भुवने समर्थः ॥१९॥
अल्लाउदीनस्य चभूपतिः स राहुः परो हिन्दुसुशासनेन्दुम् ।
जग्राह प्रान्ते बत गर्जराख्ये हा तत्त्वभूताग्निपरेशवर्षे ॥२०॥
कुमारपालस्य यशःपताकां म्लेच्छादमो मन्दिरमाजघान ।
विद्रोहभावस्य कुतस्तितिक्षा लोभाभिभूतस्य च कुत्र तुष्टिः॥२१॥
जुनागढेशो महीपालनामा (रा)खेंगार नामापि तदात्मजश्च ।
सूद्धार्य हर्म्यं ह्युकरोत्प्रतिष्ठां सुतत्त्वतत्त्वाग्निपरेशवर्षे ॥२२॥
आकर्षणं द्रव्यविलुब्धकानां प्रहर्तुकानां ततिराशशाम ।
आनर्च देवं शतहायनान्तं शान्त्यासुप्रीत्या नतभक्तवर्गः ॥२३॥
आक्रम्य तीर्थं तु मुजफ्फराख्यो वारत्रयं द्रव्यततिं जहार ।
संघर्षकाले तु हमीरवीरो भिल्लो बगेडापि लयं जगाम ॥२४॥
रसाष्टतत्त्वेशगविक्रमाब्दे दस्युर्द्वितीयोऽपि मुजफ्फराख्यः ।
चक्राम तीर्थं च जघान हर्म्यं हा हन्त षष्ठस्तु पराभवोऽयम् ॥२५॥
अथेन्द्रप्रस्थे मुगलस्य राज्यमभूद्दृढं यत्प्रथिताल्पशान्तिः ।
तत्पञ्चसप्तैकगहायनानि ह्यभ्यर्चनाया विनयेन जग्मुः ॥२६॥
औरंगजेबो मदमत्तधूर्णस्तीर्थस्य नाशाय नुनोद सूबाम् ।
न क्रूरदेहे हृदयं भवेद्धा दुराग्रहाणां जनरञ्जनं किम् ॥२७॥
धरेतिवाजीशगविक्रमाब्दे तीर्थस्य हा सप्तमितो विनाशः ।
तेनैव सार्धं जनभावनापि हा ! हन्त ! मन्ये प्रसभं हतेति ॥२८॥

अशीतिवर्षाणि प्रभासतीर्थं गतप्रभं शून्यातरं बभूव ।
घंटानिनादो न च शंखघोषो नाकर्ण्यते 'श्रीजयसोमनाथः' ॥२९॥
विध्वंसमात्रेण तु पार्थिवेन किमात्मभावोऽपि विनाशभेति ।
मत्वा निगूढं प्रभुसोमनाथमानर्च लोकःशशिभूषणेशम् ॥३०॥
स्वधर्मधात्री शुभदानदात्री संरक्षिका भारतगौरवस्व ।
परम्परायाः प्रथितात्ममूर्तिर्धन्या 'अहल्या' महिषीवरेण्या ॥३१॥
तज्जीर्णशीर्णाद्भवनात्सुपूर्व विधाय गूढं शुभगर्भगेहम् ।
चकार देवस्य पुनः प्रतिष्ठां वर्षेऽङ्ककाण्डाष्टधराप्रयाते ॥३२॥
आशा प्रदीप्ता हृदयावकाशे मलीमसध्वस्तमनः प्रसन्नम् ।
घंटाध्वनिः शंखरवः स्तुतिश्च ह्याकर्ण्य ते 'श्रीजयसोमनाथः' ॥३३॥
क गर्भगेहं क च तुङ्ग शृङ्गं सेवानुकूला वद गौरवस्य ।
साहित्य मन्त्रेण तु विज्ञवर्य्यैरुद्वेलितो लोकमनः समुद्रः ॥३४॥
दिशः प्रसन्ना धरणी प्रसन्ना तथा पसन्नं जनहृत्सरोजम् ।
प्रीतश्च गांधेरनुयायिवर्गः स्वातन्त्र्यसूर्यो ह्युदितः स्वदेशे ॥३५॥
जुनागढस्थैर्जयसोमनाथमन्त्रेण लोकैर्विजितं स्वराज्यम् ।
पलायितः पाकपरो नवाबः संगोप्य तीर्थं स्फुरति त्रिरंगः ॥३६॥
वीरव्रती भारतगौरवोत्सुकः स्वराष्ट्रशिल्पी रिपुमानमर्दकः ।
श्रीवल्लभो भारतप्राणवल्लभः समागतो मुन्शीवरेणप्रेरितः ॥३७॥
ज्ञात्वेतिहासं चीरगौरवञ्च ह्यवस्थितिं वीक्ष्य चिखेद वीरः ।
निर्माणहेतोरकरोत्प्रतिज्ञां सिन्धोः पुरो दिग्विजयेन सार्धम् ॥३८॥
लक्षं ददौ जामपुरस्य भूपो निर्माणकार्ये नवमन्दिरस्य ।
अथैकपञ्चाशदहो सहस्रं जुनागढामात्यवरः सुप्रीत्या ॥३९॥
संस्थाश्रना रिक्थसुमण्डलस्य सुघोषिता सुन्दरसौधहेतोः ।
जामेश्वरो दिग्विजयो नरेन्द्रो मुन्शी कन्हैयोत्तरराज्यपालः ॥४०॥
श्री श्यामलः श्री व्रजमोहनश्च दत्तात्रयो वामनचित्तरंजनौ ।
श्रीमद् दयाशंकरको नृसिंहो मंत्री च प्रेमाणीमोदयश्च ॥४१॥
रसाभ्रशून्याक्षिगविक्रमाब्दे वैशाखकृष्णे ह्यसंख्यकायाम् ।
जामेश्वरो दिग्विजयश्च सोमे सम्पादयामास शिलार्पणं वै ॥४२॥
लीलावसानस्य सुपुण्यभूमौ लीलावतारस्य नरोत्तमस्य ।

गीता महामन्दिरखातकार्यं चकार जामाधिपतिर्नरेन्द्रः ॥४३॥
अहं हि पूर्वस्त्वहमस्मि पूर्वः सुस्पर्धया भावनाया सुभक्त्या ।
करोति कार्यं बुधशिल्पिवर्गः श्रीमत्प्रभाशंकरसन्निदेशे ॥४४॥
सिद्धान्तशूरस्य दृढव्रतस्य राष्ट्रैक्यमूर्तेर्जनवल्लभस्य ।
दृष्टवा तनुं जर्जरितां सरित्थः सुचिन्तयामास ततः प्रतिष्ठाम् ॥४५॥
बलीयसी वै परमेश्वरेच्छा जहौ स्वदेहं जनपः पटेलः ।
संकल्पसिद्धिजननायकाय स्वर्गेऽपि शान्तिं महतीं ददाति ॥४६॥
मान्यः स राजेन्द्रप्रसादवर्यो राष्ट्राग्रणीर्भारतगौरवोत्सुकः।
प्रासादगर्भे ह्यकरोत्प्रतिष्ठां हयाश्रशुन्याक्षिगते शिवस्य ॥४७॥
विद्यासरित्संगमतीर्थराजैः सुयाज्ञिकैर्वेदविशारदैश्च ।
सम्पादितं पूजनयज्ञकार्यमापूरितं व्योम सुवेदघोषैः ॥४८॥
भुषण्डिघोषो जयसोमनाथः शंखध्वनिर्मंगल वाद्यगीतम् ।
घंटारवो मंगलप्रार्थना च सोल्लाससोत्साहप्रवाहप्राप्तिः ॥४९॥
तीर्थेन पूर्वा महती प्रतिष्ठा सम्पादिता गौरवपूर्णधन्या ।
राष्ट्रं प्रसन्नं धरणी प्रसनन्ना सवर्त्रघोषो ''जयसोमनाथः''॥५०॥
यस्याममद्भारत संस्कृतेश्च सनातनस्य प्रसरः प्रचारः ।
तद्देववाणीसुविकासहेतोः संस्थापिता सस्कृतविश्वपर्षद् ॥५१॥
अध्यक्षवर्यो बलरामसंज्ञः सत्प्रेरको मुन्शीमहोदयश्च ।
श्रीटंडनः श्रीपुरुषोत्तमाख्य उद्घाटनं सत्समितेश्चकार ॥५२॥
सन्निर्मिते प्रोच्चकलात्मसौधे सौधाभिषेकं विधिना विधाय ।
संस्थापयामास सुहेमशृङ्गं ध्वजं महादिग्विजयो नरेन्द्रः ॥५३॥
कलाप्रवीणा ननु शिल्पपदक्षाःस्थापत्यकार्ये किलसिद्धहस्ताः ।
सुशिल्पिनो धन्यतराः सदैव सुविश्रुताः सोमपुराजगत्याम् ॥५४॥
गुलाबदेव्या सहितो नरेन्द्रो निर्वाणभूमौ यदुनन्दनस्य ।
संस्थापयामास मुकुन्दमूर्तिं प्रासादभव्येऽङ्कधराग्रनेत्रे ॥५५॥
लेभे ततोभारतगौरवं हि ज्योतिर्मयेष्वादितमं सुलिङ्गम् ।
भक्त्या सुप्रीत्या प्रणयेन लोकाः प्रभासतीर्थं समुपाश्रयन्ति ॥५६॥
दोधूयते भारतकीर्तिकेतुरत्तुङ्गशृङ्गे नवमन्दिरस्य ।
सनातन श्रीविजयस्य घोषं सारस्वरेण प्रकरोति सिन्धुः ॥५७॥

- युग्मक्रम -

नवीनविश्वस्त सुमण्डलस्य मोरारजी श्री प्रमुखो वरेण्य : ।
श्री खण्डुभाई जयसौख्यलाल श्रीमद् दयाशंकरचितरंजनौ ॥५८॥
सौजन्यधन्यौ ब्रजमोहनश्च सर्वे सदस्या निजधर्मदक्षाः ।
मंत्री च प्रमाणी महोदयश्च मान्योऽर्थशास्त्री सुप्रबंधविज्ञः ॥५९॥

- युग्मक्रम -


शरेणविद्धोऽपि प्रसन्नवक्त्रो व्याधाय दानं त्वभयस्य कुर्वन ।
प्रहृत्य भारं प्रहरन्नृलीलां चतुर्भुजः श्रीयदुवंशनाथः ॥६०॥
श्री द्वारकेशं प्रतिमावतारं देसाईवर्यः शुभभल्लुकाख्ये ।
संस्थापयामास सुभव्यसौधे काण्डद्विशून्याक्षिगविक्रमाब्दे ॥६१॥
निर्वाणभूमौ यदुनन्दनस्य संस्थापयामास हलायुधं तम् ।
कृष्णाग्रजं श्रीजयसौख्यलालः काण्डद्विशून्याक्षिगविक्रमाब्दे ॥६२॥
स्वर्गस्थभर्तुजनवल्लभस्य स्मृत्यां महाद्वारमतीव भव्यम् ।
कलात्मकं दिग्विजयेन नाम्ना नार्मापयामास तु राजमाता ॥६३॥
प्रासादपूर्वे ह्यजिरे प्रशस्ते श्रीवल्लभस्याकृतिमूर्ति प्रेष्ठा ।
अनावृता श्रीरविशङ्करेण सत्प्रेरणानिर्झरनीरसिन्धुः ॥६४॥
धर्मस्य वेदस्य सुसंस्कृतेश्च ह्याचारशास्त्रस्य सनातनस्य ।
ज्ञानाय लोके सुप्रचार हेतोः संस्थापिता संस्कृत पाठशाला ॥६५॥
चन्द्रज्योत्स्नाधवलितशिरा जान्हवीवारिसिक्तः गौरिदेहावृतशुभवपुर्मुण्डमाली कपाली ।
ज्योतिर्लिङ्गप्रवरप्रमुखः सोमनाथः
कृपालुरव्याद्रिक्थं वितरतु शिवं पार्षदेभ्यः समन्तात् ॥६६॥
तीर्थस्यातीर्थराजः सुकलितविभवं लोककल्याणमुख्यं श्रद्धाभक्ति
प्रधानजनहितमनसः पार्षदाः सर्वदा स्युः ।
कीर्तीरिक्थस्य भूयात् सुरभिसुमनसो लोकसेवावरिष्ठाः
अव्याद् वः सोमनाथो विषमभयहरो दिव्यलिङ्गेषु मुख्यः ॥६७॥

# UNIVERSITY LOGO

# UNIVERSITY TARGET



# UNIVERSITY’S MISSION




श्रीसोमनाथसंस्कृतयुनिवर्सिटी
Our Target
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
Our Motto - Pūrṇatā Gauravāya
Our Mission
श्री सोमनाथ संस्कृत युनिवर्सिटी लोकार्पण
श्री सोमनाथ संस्कृत युनिवर्सिटी
Google
Veraval, Gujarat, India
Rajendra Bhuvan Road, Salinity Colony, Rayon
Factory Area, Veraval, Gujarat 362266, India
Lat N 20° 54' 51.336" Long E 70° 21' 11.4588"



Our Mission
Our Target
Veraval, Gujarat, India
Rajendra Bhuvan Road, Salinity Colony, Rayon
Factory Area, Veraval, Gujarat 362266, India
Lat N 20° 54' 51.2964" Long E 70° 21' 9.8964"
Google